# Advaita-rasa-manjari

# અદ્વૈતરસમઞ્જરી

## Document Information

Text title : advaitarasamanjari

File name : advaitarasamanjari.itx

Category : major_works, sadAshivabrahmendra

Location : doc_z_misc_major_works

Author : shriimatparamaha.nsa parivraajaka sadaashiva brahmendra

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : Dec. 3, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# અદ્વૈતરસમઞ્જરી

શ્રી ગણેશાય નમઃ ॥

શ્રી ગુરુભ્યો નમઃ ॥

॥ અદ્વૈતરસમઞ્જરી ॥

અખણ્ડસત્યજ્ઞાનાનન્દામૃતસ્યાત્મસ્તવ-
સ્તવાદિકં કથં કુર્યાં કરણાગોચરત્વતઃ ॥ (૧)
સ્વભક્તલોકાનુજિધૃક્ષયૈવયા
સમસ્તલોકાનુગતા વિરાજતે ।
અકાદિરૂપેણ શુકાદિવન્દિતાં
નમામિ તં શ્રીલલિતાં સ્વદેવતામ્ ॥ (૨)
ગજમુખમુપરિષ્ટાન્માનવાઙ્ગં ત્વધસ્તા-
નરપરપરમૈક્યજ્ઞાપનાયભ્યુપેત્ય ।
પરિલસતિપરસ્તાન્મોહજાલાન્મહોય-
ત્તદિહ મમ પુરસ્તાદસ્તુ વસ્તુપશસ્તમ્ ॥ (૩)
વટતરુનિકટે શ્રીદક્ષિણામૂર્તિરૂપં
યદધિવસતિ સચ્ચિન્મુદ્રયા ભદ્રયાર્થમ્ ।
પરમમમૃતમન્તેવાસિનાં સમ્પ્રદાતું
તદિહવરદમેકં ભાવયે ભાવશૂન્યમ્ ॥ (૪)
યતીન્દ્રમણ્ડલં ધ્યાયન્નખણ્ડરસમણ્ડલમ્ ।
અદ્વૈતરસમઞ્જર્યાઃ કુર્વેઘ સુવિકાસિનીમ્ ॥ (૫)
અબદ્ધાઽપિ સુબદ્ધૈષા સતા બદ્ધસુદૃષ્ટિના ।
ભવેત્સન્તોષવન્તો હિ સન્તસ્સન્તિ સમેક્ષણાઃ ॥ (૬)
પાદશૂન્યપતગાયિતસ્ય મે ખેરત્વમતિદુર્લભં ખલુ ।
તદ્વિદોઽપિ તદવાપ્તુમિચ્છત- સ્સાહસં સહતુ સૌહૃદીજનઃ ॥ (૭)
અદ્વૈતમેવ પરમાર્થતયા વિવેક્તુ-

મઙ્ગીકૃતદ્વિપનરાકૃતિસન્નિવેશઃ ।
અદ્વૈતગોચરમશેષવિદોષમન્ત-
રાવિષ્કરોતુ વરદો મમ વિઘ્નરાજઃ ॥ ૧॥

અજ્ઞાનવિસ્ફુરદનેકવિધાત્મભેદ-
મજ્ઞાનમાશ્રિવતસ્સુલભા ન મુક્તિઃ ।
આદર્શગેહમમિતઃ પ્રતિબિમ્બિતાન્ત-
ર્દ્વારં ગતસ્ય ન બહિર્ગતિરર્ભકસ્ય ॥ ૨॥

શાન્ત્યાદિસાધનવતા પુરુષોત્તમેન
સમ્પ્રાપ્યતે નિજપદં વરદેશિકોક્ત્યા ।
ચોરૈરણ્યસરિણીં ગમિતેન પુંસા
દેશો નિજો હિ તદભિજ્ઞગિરૈવ ગમ્યઃ ॥ ૩॥

ભૂમા ભવાનિતિ ગુરૂપનિષદ્વચોભિઃ
કર્ત્રાત્મતા ગલતિ સિદ્ધ્યતિ ભૂમભાવઃ ।
રાજાત્મજસ્ય નિજતત્વનિબોધનેન
વ્યાધાત્મતાવિગલનાદિવ રાજભાવઃ ॥ ૪॥

કૂટસ્થનિત્યસુખબોધતનોઃ પ્રતીચો
બન્ધો વિમોચનમિતિ ભ્રમ દુર્વિલાસઃ ।
વન્ધ્યાસુતસ્ય વપુરાદિગુણપ્રપઞ્ચ-
સ્તત્પઞ્ચતાઽપિ સુતરાં પરિકલ્પનૈવ ॥ ૫॥

આપાતતઃ પ્રતિભયા જગદસ્તિવાદઃ
સત્યં નિરૂપણવિધૌ ન હિ કિઞ્ચિદસ્તિ ।
ભીરોર્વિભાતિ પરિતસ્તિમિરં પિશાચ-
સ્તત્રૈવ દીપકલિકાઽઽનયતે કિમસ્તિ ॥ ૬॥

ચિજ્જ્યોતિરેવ જગદાત્મતયા ચકાસ્તિ
વસ્ત્વન્તરં કિમપિ નાસ્તિ વિચાર્યમાણે ।
રજ્જ્વૌ ભ્રમાધિકરણાદપિ રજ્જુસર્પ
તત્ત્વાન્તરં ભવિતુમર્હતિ કિં કથઞ્ચિત્ ॥ ૭॥

વિશ્વં સમસ્તમપિ વિભ્રમમાત્રમેત-
દાત્મૈવ સન્નયનન્યસુખપ્રકાશઃ ।
સ્ફૂર્ત્યૈવ વિશ્વમપિ સત્યમિતીર્યતે ચેત્

કો નામ શુક્તિરજતેન ધનીનભાવિ ॥ ૮॥

નાસ્તિ પ્રતીત્યવસરે ન પુરા ન પશ્ચા-
દાશ્ચર્યમેતદવભાતિ તથાઽપિ વિશ્વમ્ ।
યદ્વા કિમદ્ભુતવિવેહ મહેન્દ્રજાલં
માયાવિકલ્પિતમિતિ પ્રતિભાસતે હિ ॥ ૯॥

એકોઽપિ સન્નયમનેકતયા વિભાતિ
ભૂમા સ્વકલ્પિતતમઃ પટલાનુષઙ્ગાત્ ।
ઇન્દુર્દ્વિતીયરહિતોઽપિ ચ સદ્વિતીય-
ભાવેન ભાતિ પુરુષસ્ય નિજાક્ષિદોષાત્ ॥ ૧૦॥

આલોક્યતે ભુવનચક્રમલાતચક્ર-
મત્યન્તવિભ્રમવિજૃમ્ભિતમસ્થિરં ચ ।
દૈવાત્ ભ્રમસ્યવિરતૌ સમુપસ્થિતાયાં
નાલોક્યતે કિલ પુરેવ પુનસ્તદેવ ॥ ૧૧॥

ગન્ધર્વપત્તનમિદં જગદવ્યવસ્થં
ચૈતન્યનામનિ વિહાયસિ નશ્યકાસ્તિ ।
વિદ્યોતતે યદિ ચ વિદ્યુદિવાત્મવિદ્યા
સદ્યસ્તિરોભવતિ સર્વમિદં તદૈવ ॥ ૧૨॥

આરોપિતસ્ય જગતઃ પ્રવિલાપનેન
ચિત્તં શિવાત્મકતયા પરિશિષ્યતે નઃ ।
શત્રૂન્ નિહત્ય હતયિન્તુરધોનિપ્રાતાત્
ગન્ધદ્વિપો ભવતિ કેવલમદ્વિતીયઃ ॥ ૧૩॥

અદ્યાસ્તમેતુ વપુરાશિતારમાસ્તાં
કસ્તાવતાપિ મમ ચિદ્વપુષો વિશેષઃ ।
કુમ્ભેઽપિ નશ્યતિ ચિરં સમવસ્થિતે વા
કુમ્ભાંબરસ્ય નહિ કોઽપિ વિશેષલેશઃ ॥ ૧૪॥

સઙ્કલ્પમાત્રસવિકલ્પિતમૂર્તિવિશ્વં
વિશ્વં ચ સત્યમિતિ મૂર્ચ્છિતમન્દબુદ્ધિઃ ।
ચિન્તાપ્રકર્ષજનિતાં વનિતાં વિદિત્વા
શૈવેતિ વલ્ગતિ યથા ચિરવિપ્રયુક્તઃ ॥ ૧૫॥

સ્વસ્થે મયિ સ્વરસસત્યસુખાવબોધે
    વ્યામોહનાજ્જગદિતિ વ્યપદિશ્યતે યત્ ।
અન્યત્ર કુત્રચિદદૃષ્ટમરૂપરૂપ-
    મસ્થાનચિત્રમિતિ નિશ્ચિનુમસ્તદેતત્ ॥ ૧૬॥

આધ્યાસિકસ્ફુરણભેદતિરોહિતોऽપિ
    ચિદ્ધાતુરેકરસતાં ન જહાતિ જાતુ ।
નાનાચરાચરવિચિત્રવિચિત્રિતોऽપિ
    ચિત્રઃ પટો ન પટભાવમપાસ્યતિ સ્વમ્ ॥ ૧૭॥

સચ્ચિત્ સુખાત્મકમખણ્ડિતમાત્મતત્ત્વં
    મન્યેત કશ્ચિદહમિત્યતિનિશ્ચિતાર્થમ્ ।
દેહેન્દ્રિયાદકમપિ વિભ્રમવાસનાભિ
    વ્યામો મમાહમિતિયદ્વદવિદ્વદાત્મા ॥ ૧૮॥

વિશ્વં મૃષા વિરસમિત્યવધાર્ય ધૈર્ય-
    માસ્વાદ્યતે મુનિભિરન્તરસૌ રસાત્મા ।
સન્તાપજં મરુમરીચિરસં નિરસ્ય
    સંસેવ્યતે સુમતિભિસ્સુરસિન્ધુપૂરઃ ॥ ૧૯॥

એકાન્તસન્નિહિતમીદૃશમાત્મતત્ત્વં
    લોકા વિમૂઢમતયો બત નાદ્રિયન્તે ।
આકાશગોચરમશેષજગત્પ્રકાશં
    ઘૂકા ન ભાસ્કરમુદીક્ષિતુમુત્સહન્તે ॥ ૨૦॥

આનન્દવિસ્ફુરણરૂપમપિ પ્રપઞ્ચ-
    મન્યં વિભાવ્ય પરિતાપમુપૈતિ મુગ્ધઃ ।
દીપાદિષુ સ્વવપુષઃ પરિદૃશ્યમાનાં
    છાયાં વિગાહ્ય પરિમુહ્યતિ કિં ન બાલઃ ॥ ૨૧॥

માયા સ્વકીયવિયદાદિવિકારજાલૈ-
    ર્નાત્માનમન્યથયિતું પ્રભવત્યસઙ્ગમ્ ।
આધારપુષ્કરપલાશકમંબુધારા
    સ્વીયૈઃ કિમાર્દ્રયિતુમર્હતિ શીકરૌઘૈઃ ॥ ૨૨॥

આભાસમાત્રતનવો જગતીવિકલ્પા
    માં ન સ્પૃશ્યન્ત્યપિ વિમુક્તસમસ્તસઙ્ગમ્ ।

આરોપિતા મલિનતાદિવિચિત્રધર્મા
    લિમ્પન્તિ કિં નુ વિમલં વિયદન્તરાલમ્ ॥ ૨૩॥

સ્વપ્નસ્સુષુપ્તિરથજાગ્રદિતિ હ્યવસ્થા-
    સ્તિસ્રોઽપિ શશ્વદુદયાસ્તમયૈરુપેતાઃ ।
નિર્મોકરાજય ઇવોરગરાજભોગે
    મય્યેવ સાક્ષિણિ વિભાન્ત્યનુવર્તમાને ॥ ૨૪॥

સ્વપ્નઃ પ્રજાગ્રદિતિ શબ્દકૃતો વિશેષો
    માયામયત્વમુભયોરપિ તુલ્યમેવ ।
પ્રત્યક્પરાગિતિ નામકૃતો વિકલ્પઃ
    સત્યાવબોધસુખતાં તુ તયોસ્સ્વરૂપમ્ ॥ ૨૫॥

સર્વેન્દ્રિયોપરમશાન્તજગદ્વિકલ્પાઃ
    સ્વાનન્દમાત્રપરિશેષિતચૈત્યબોધે ।
તે જાગ્રતોઽપ્યનુભવન્તિ સુષુપ્ત્યવસ્થાં
    ક્રીડન્તિ યે સતતમાત્મનિ સત્યબોધે ॥ ૨૬॥

કર્તેતિ કાયિકવિચેષ્ટિતદર્શિનો માં
    ગૃહ્ણન્તિ ચેત્ કિમુ યથૈવ તથા ભવામિ ।
પારિપ્લવોઽયમિતિ પામરધીગૃહીત-
    શ્ચન્દ્રસ્તથા નહિ ચલાંબુદસન્નિકૃષ્ટઃ ॥ ૨૭॥

મિથ્યા સમુલ્લસતુ નામ જગદ્વિચિત્ર-
    મેતાવતા વિમલતત્વવિદો ન હાનિઃ ।
સ્વપ્ને ભયઙ્કરગજાદિનિરીક્ષણેઽપિ
    ન સ્વાપ્નકત્વમનુસન્ધધતોઽસ્તિ ભીતિઃ ॥ ૨૮॥

અત્યન્તમેતદસદિત્યપિ ચાવ્યવસ્થં
    મય્યાત્મદૃષ્ટિરનુવર્તત એવ લોકમ્ ।
નાસ્ત્યત્ર વક્ત્રમિતિ નિશ્ચિતવાનપિ દ્રા-
    ગાદત્ત એવ મુકુરં મુખદર્શનાય ॥ ૨૯॥

ઉદ્બોધિતોઽપિ કબલે કબલે જનન્યા
    નિદ્રાલસશ્શિશુરિવાવિદિતાન્યભાવઃ ।
આલોકયન્નપિ બહિર્જગદિન્દ્રજાલ-
    મન્તઃ કયાપિ કલયા ન પરિચ્યુતોઽસ્મિ ॥ ૩૦॥

દૃશ્યે સ્ફુટીભવતિ નેક્ષ્યત એવ ભૂમા
ભૂમ્નિ સ્ફુટીભવતિ નેક્ષ્યત એવ દૃશ્યમ્ ।
દ્વીપાન્તરે સ્ફુરતિ ભૂમિરિયં ન દૃશ્યા
ભૂમણ્ડલે સ્ફુરતિ તચ્ચ તથા ન દૃશ્યમ્ ॥ ૩૧॥

બોધે શનૈરુપચયં પ્રતિપદ્યમાને
વિચ્છિદ્યતે હૃદિ તદા વિમલં ભ્રમોઽપિ ।
ચન્દ્રે કલાભિરનુવાસરમેધમાને
મન્દીભવત્યપિ યથૈવ મહાન્ધકારઃ ॥ ૩૨॥

બ્રહ્માનુભૂતિરસનિર્ભરિતે મુનીન્દ્રે
કર્માનુબન્ધવિધયો વિમુખીભવન્તિ ।
સિદ્ધોપદર્શિતરસાયનપાનતૃપ્તે
કિન્નુ વ્યપાકવિષયા વિધયઃ ક્રમન્તે ॥ ૩૩॥

સર્વાત્મતામુપગતોઽપિ મુનિસ્સમાધિં
પૂર્વાનુવૃત્તમયતે સમયાપનુત્યૈ ।
પર્યાપ્તસર્વવિભવઃ ક્ષિતિપોઽપિ કાલ-
નિર્યાપણાય જુષતે ચતુરઙ્ગલીલામ્ ॥ ૩૪॥

આત્મજ્ઞમસ્તમિતસર્વવિધિપ્રવૃત્તિ-
માનન્દયન્તિ નિગમાભિમતા નિષેધાઃ ।
વ્યાપારમાત્રવિમુખસ્ય મહાલસસ્ય
માશબ્દકવ્યવહૃતાનિ મનોહરાણિ ॥ ૩૫॥

તત્ત્વાનુચિન્તનપરો મુનિસાર્વભૌમઃ
સ્વચ્છન્દતો વ્યવહરન્નપિ નાનુયોજ્યઃ ।
સામ્રાજ્યમેત્ય હિ યથારુચિ વર્તમાનો
રાજા પ્રજાભિરનુયોક્તુમશક્ય એવ ॥ ૩૬॥

પ્રારબ્ધજામધિકસમ્પદમાપદં વા
ભુઞ્જાન એવ પુરુષઃ પરિશુદ્ધિમેતિ ।
કિં વાઽઽહિતુણ્ડિકગૃહીતતનુર્ભુજઙ્ગ-
સ્તત્ક્લૃપ્તદણ્ડનવિધિં પરિહર્તુમીષ્ટે ॥ ૩૭॥

પૂર્વોત્તરાર્જિતશુભાશુભકર્મભિસ્સ્વ-

સમ્પદ્વિપશ્ચ ન ભવેત્ પરમાર્થદૃષ્ટેઃ ।
જાત્યોષરસ્ય ધનવર્ષજલાભિષેકૈ-
રત્યોષ્મણા ચ નહિ સસ્યવિવૃદ્ધિહાની ॥ ૩૮॥

પ્રારબ્ધકર્મપરિપાકવશંવદો ન
ક્લિશ્નાતિ નિશ્ચિતપરાવધિરાત્મવેદી ।
ગ્રામાન્તમાર્ગપરિમાણવિદધ્વનીનો
મધ્યેપથં ન હિ વિષીદતિ દુઃખિતોઽપિ ॥ ૩૯॥

અન્તર્બહિશ્ચ પરમાર્થતયાનુપશ્યન્
ન ક્લિશ્યતિ વ્યસનમુત્કટમપ્યુપેતઃ ।
ધીરઃ કિલાહમુખે વિજયૈકદૃષ્ટિઃ
પ્રત્યર્થિભિઃ પ્રમથિતોઽપિ ન વિક્લવસ્સ્યાત્ ॥ ૪૦॥

પ્રાપઞ્ચિકસ્તુ વિભવઃ પરમાદ્ભુતોઽપિ
ધીરં ન રઞ્જયતિ દૃષ્ટતદીયતત્વમ્ ।
સ્ત્રીવેષભૂષિતતનુઃ પુરુષો વિલાસૈ-
સ્તજ્ઞં યુવાનમપિ મોહયિતું હિ નાલમ્ ॥ ૪૧॥

અન્તર્નિરન્તરનિગૂઢનિજાત્મતત્વો
ન પ્રાગિવ વ્યસનિતાં વિષયેષુ ધત્તે ।
ભાગ્યાત્ કુતશ્ચિદપિ લબ્ધનિધિર્મનસ્વી
કિં પૂર્વવત્ કૃપણતામુરરીકરોતિ ॥ ૪૨॥

અધ્યાસ્થિતસ્વમહિમાનમલક્રિયા વ-
દાધ્યાત્મિકાશ્શુભગુણાસ્સ્વયમાવિશન્તિ ।
સ્વાધીનિતે સુહૃદિ રાજનિ તસ્ય ભૃત્યા
એતેઽપિ ચ સ્વયમુપેત્ય તમાશ્રયન્તે ॥ ૪૩॥

અજ્ઞાનમેવ ન કુતો જગતઃ પ્રસઙ્ગો
જીવેશદેશિકવિકલ્પકથાઽપિ દૂરે ।
એકાન્તનિર્મલચિદેકરસસ્વરૂપં
બ્રહ્મૈવ કેવલમહં પરિપૂર્ણમસ્મિ ॥ ૪૪॥

ઇતિ શ્રીમત્પરમહંસ પરિવ્રાજક સદાશિવ બ્રહ્મેન્દ્ર વિરચિતા
અદ્વૈતરસમઞ્જરી સમ્પૂર્ણા ॥

*Advaita-rasa-manjari*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*